# 12 संस्कृत-निबन्ध

(जनसंख्या, पर्यावरण, स्वास्थ्य शिक्षा एवं यातायात के नियम)

## 1. विद्या (विद्यायाः महत्त्वम्) (2019AU, 20MR, MU)

### अथवा विद्या धर्मेण शोभते अथवा विद्या विहीनः पशुः (2020MS)

### अथवा विद्याधनं सर्वधनं प्रधानम् अथवा विद्या महिमा

### अथवा विद्या ददाति विनयम्

अस्मिन् संसारे विद्या एव सर्वप्रधानं धनम् अस्ति। विद्याधनं चौरोऽपि चोरयितुं न शक्नोति। नृपः अपहर्तुं न शक्नोति। अन्यधनं भ्राता विभज्यते, किन्तु विद्याधनं भ्राता न विभज्यते। उक्तम् च–

**न चौरहार्यं न च राजहार्यं, न भ्रातृभाज्यं न च भारकारि।**
**व्ययेकृते वर्धते एव नित्यं, विद्या धनं सर्वधनं प्रधानम्।।**

विद्याः बहुविधाः भवन्ति, यथा साहित्यं, संगीतं, कला, विज्ञानम् इति। विद्या तु निरन्तरम् अभ्यासेन परिश्रमेण वा प्राप्तुं शक्यते। विद्यया मानवस्य बुद्धे विकासः भवति। विद्या विनयं ददाति। विद्यायाः कोशः अद्वितीयः भवति।

साम्प्रतं सर्वत्र शस्त्राणां स्पर्द्धा वर्द्धते, यया मानवजीवनं संकटापन्नं विनाशोन्मुखं च भवति। अतः ज्ञानस्य उपयोगः मानवकल्याणाय एव भवेत्, एतदर्थं गंभीरतया विवेचनीयम्।

## 2. सदाचारः (2019AP, AQ, 20MP, MR, MU)

### अथवा यः सदाचारवान्नरः

सताम् आचारः सदाचारः कथ्यते। सज्जनाः यद् आचरन्ति तथैव आचरणं सदाचारः कथ्यते। सदाचारणम् एकः अलौकिक गुणः अस्ति। समाजे सदाचारस्य व्यवहरणम् अनिवार्यम् अस्ति। सदाचारः मानवस्य अलौकिक विभूषणम्। मूर्खाणाम् एव जीवनं सदाचारविहीनं भवति।

सदाचारी सर्वैः सह शिष्टतापूर्वकम् आचरन्ति। यः सत्यं वदति, नित्यं पितरौ अभिवादयति, गुरुजनानाम् आदरं करोति, परोपकारं च करोति तस्य आयुः विद्यादि वर्धन्ते।

सदाचारस्य महत्त्वं सर्वेषु धर्मेषु समानरूपेण स्वीकृतम् अस्ति। अतः मानवतायाः विकासाय सर्वैः सदाचारः प्रयत्नपूर्वकं पालनीयः रक्षणीयश्च।

## 3. परोपकारः (2018HP, HQ, 19AP, 20MP, MQ, MS, MU)

परेषाम् उपकारः परोपकारः कथ्यते। स्वार्थं परित्यज्य अन्येषां कल्याणेच्छया यत् किञ्चित् क्रियते तत् परोपकारः कथ्यते। परोपकारः मानवस्य एकः उत्तमः गुणः अस्ति। परोपकारेण जनेषु सुखशान्ति वृद्धिः भवति। परोपकारिणः जनाः परोपकारेणैव प्रसन्नाः भवन्ति। परोपकारस्य भावना मानवेषु एव न, देवेषु, पशुपक्षिवृक्षादिषु अपि च भवति।

महात्मा दधीचिः परोपकाराय एव स्वशरीरस्य अस्थीनि अपि ददौ प्राणांश्च अत्यजत्। गौतमबुद्धः प्राणिनां दुःखविनाशाय एव सर्वभोगायतनं राजप्रासादं परित्यज्य महता कष्टेन तपः अकरोत् बुद्धत्वं च प्राप्नोत्। महात्मा ख्रीष्टः दयालुः मुहम्मदः च जनानां दुःखविनाशाय एव स्वजीवने अपारं कष्टं सोढवन्तौ। राष्ट्रपिता महात्मा गान्धि राष्ट्रस्य स्वतंत्रतायै एव बहुबारं कारागारम् असेवत अवर्णनीयानि कष्टानि च असहत।

न केवलं मनुष्याः अपितु प्रकृतिः अपि परोपकारे रता दृश्यते। नद्यः स्वयमेव जलं न पिबन्ति, वृक्षाः स्वयं फलानि न खादन्ति, किन्तु तासां जलं, तेषाम् फलानि च परोपकाराय एव भवन्ति। अतः अस्माभिः अपि सदा परोपकारः करणीयः।

## 4. सत्संगतिः (2019AO, AP, 20MT)

सत्पुरुषाणां सङ्गतिः सत्सङ्गतिः कथ्यते। सज्जनानां सङ्गतिः सुखकरी भवति। सज्जनाः सदैव समाजे आदर्शरूपेण स्वीक्रियन्ते। सत्सङ्गत्या जनः उन्नतिपदं प्राप्नोति। सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति। पापं दूरी करोति दिक्षुः च यशः तनोति।

सत्संगत्या नराणाम् अज्ञानं, पापं, अधर्मं च नश्यति। सत्संगतिः नरस्य सर्वान् मनोरथान् पूरयति। सत्संगतिः नरस्य सम्मानं वर्धयति। सत्संगतिः नरस्य पापानि अपाकरोति। न केवलं मनुष्येषु अपितु जडवस्तुषु अपि संगतेः स्पष्टः प्रभावः दृश्यते। धूपेन सह धूमः अपि सुगन्धितः भवति। अतः अस्माभिः सदा सत्संगः कार्यः, कुसंगः च सर्वथा परित्याज्यः।

## 5. अहिंसा परमो धर्मः (2020MQ, MU)

परेषां हिंसनं पीडनम् एव हिंसा भवति, एतद् विपरीत भावना अहिंसा भवति। मनसा, वाचा, कर्मणा, कथमपि कस्यचित् कष्टं न देयमित्येवाहिंसा। भारतवर्षे बहवः धर्माः सन्ति। तेषु सर्वेषु धर्मेषु अहिंसायाः महत्त्वपूर्णं स्थानम् अस्ति। अस्मिन् संसारे कोऽपि धर्मः एतादृशः न अस्ति, यस्मिन् अहिंसायाः महत्त्वं न स्वीक्रीयते। 'अहिंसा परमो धर्मः' इति सर्वाणि शास्त्राणि कथयन्ति। मनुना मनुस्मृतौ निर्दिष्टेषु धर्मस्य दशलक्षणेषु अहिंसायाः सर्वप्रथमः उल्लेखः अस्ति।

अहिंसा एकं परमं तपः अस्ति। भारतीयधर्मस्य संस्कृतेः च मूलाधारः अहिंसा एव अस्ति। बौद्धजैनधर्मस्य च मूलम् अहिंसा एव विद्यते। अहिंसया सर्वत्रं शान्तिः प्रसरति शान्त्या च सर्वे जनाः सुखिनः भवन्ति। अतः सर्वैः अहिंसायाः पालनम् अवश्यं करणीयम्।

## 6. राष्ट्रियैकता ( राष्ट्रीय एकता ) (2019AR, AS)

विविध धर्म-भाषावलम्बिनां जनानां वासस्थानं राष्ट्रं भवति। परन्तु धर्म-भाषा-वैविध्येऽपि एकस्मिन् राष्ट्रे वसन्तः जनाः अभिन्नाः एव भवन्ति। यथा एकस्मिन् गृहे वसन्तः बहवः जनाः पृथक् वस्त्राभूषणानि धारयन्ति पृथगेव चिन्तयन्ति च परं मूलतः ते एकस्यैव गृहस्यैव अंगानि भवन्ति, अतः अभिन्नाः एव तिष्ठन्ति।

एवमेव वयं स्वराष्ट्रे वसन्तः पृथक् भाषा-भाषिणः। अत्र पृथक् धर्मावलम्बिनः निवसन्ति। पृथक् विचारानुयायिनः सन्तः अपि अभिन्नाः सन्ति। यतो हि भारतम् अस्माकं राष्ट्रं वयं च अस्य राष्ट्रस्य नागरिकाः। राष्ट्रं यदि सुरक्षितम् अस्ति तर्हि वयमपि निस्सन्देहं सुरक्षिताः। राष्ट्रं यदि विकसितम् तर्हि अस्माकमपि विकासः सुनिश्चितः एव।

अतः अस्माकं सर्वेषां भारतीयानां राष्ट्रियैकता प्रथमं कर्त्तव्यम् अस्ति। यद् राष्ट्रियैक्यस्य वाधकानि तत्त्वानि निवारयेम राष्ट्रियाम् एकतां च पोषयेम एतेनैव राष्ट्रस्य अस्माकं सर्वेषां च समुन्नतिः समृद्धिश्च सुनिश्चिता।

## 7. भारतीय कृषकः (2019 AP)

यः कृषिं करोति सः कृषकः इति उच्यते। कृषि कर्मणि पशूनां विशेषं महत्वम् अस्ति। वृषभाः हलं शकटं च कर्षन्ति गावः दुग्धं ददाति। तेषां गोमयेन खादं भवति यच्च अन्नोत्पादने सहायकं भवति। तस्मादेव कारणात् कृषकः भूमिं पशून् च भृशम् अर्चयति।

पुरा कृषिः हलवृषभाश्रिता एव आसीत्। अद्य नवीनानि कृषियन्त्राणि निर्मितानि। येषां साहाय्येन अल्पेन कालेन विपुलं कार्यं सम्पद्यते। येषां साहाय्येन विपुलम् अन्नम् उत्पद्यते कृषकाः च समृद्धिं गच्छन्ति। नवीनानि कृषियन्त्राणि बहुमूल्यानि सन्ति। येन न सामान्यः अपितु मध्यमवर्गीयः अपि कृषकः एतानि यंत्राणि क्रेतुम् असमर्थः। अतः अद्यापि भारतीय कृषकः विपुलं श्रमं कृत्वापि अभावग्रस्तः एव अस्ति।

## 8. मातृभूमिः ( अस्माकं देशः ) (2018HP, HR, 19AS, AT, AU, 20 MR, MS)

***अथवा* भारत देशः *अथवा* अस्माकं भारत देशः**

***अथवा* जन्मभूमिः *अथवा* अस्माकं जन्मभूमिः**

अस्माकं भारतदेशः विश्वस्य एकः महानः देशः अस्ति। भारतभूमिः अस्माकं मातृभूमिः। यथा उक्तम् – 'माता भूमिः, पुत्रोऽहं पृथिव्याः' इति। जन्मभूमिः अस्माकं जननी अस्ति। यतो हि अस्याः एव क्रोडे क्रीडित्वा वयं स्वशैशवम् अतिक्रम्य यौवनम् प्राप्ताः। इयं मातृभूमिः स्वर्गात् अपि श्रेष्ठा। यत्र वयं सुखेन वसामः, विविधान् भोगान् च अनुभवामः।

अस्माकं मातृभूमिः सुफला, सुजला, शस्य श्यामला अस्ति। सागरः अस्याः चरणौ प्रक्षालयति। हिमालयः अस्याः शुभं किरीटम्, विन्ध्याद्रिः अस्याः कटिः। विविधः नद्यः अमृततुल्येन जलेन इमां सिंचन्ति। सूर्यः प्रतिदिनं प्रातः इमां प्रणमति, खगाश्च कलश्वनैः इमां स्तुवन्ति। देवाः अपि अस्य महत्त्वं गायन्ति–

**गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमि भागे।**
**स्वर्गापवर्गास्पद मार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात्।।**

## 9. हिमालयः (2019AR)

भारतवर्षस्य उत्तरस्यां दिशि प्रहरी इव स्थितः उच्चतमः पर्वतः हिमालयः अस्ति। अस्य शिखराणि सदैव हिमेन आच्छादितानि तिष्ठन्ति, अतएव अयं हिमस्य आलयः 'हिमालयः' इति कथ्यते। अयं सर्वेषां पर्वतानाम् उच्चतमः अस्ति, अतः 'पर्वतराजः' अपि कथ्यते। हिमालयः विश्वस्य विशालतमः पर्वतः अस्ति। अस्य पर्वतस्य कन्दरासु तपः कुर्वन्तः मुनयः परां सिद्धिं प्राप्नुवन्ति। अस्य समुन्नतेषु भागेषु मनोहराणि वनानि सन्ति। महाकविः कालिदासः कुमारसम्भवमहाकाव्ये अस्य वर्णनम्

अकरोत्–

**अस्त्युत्तरस्यां दिशि देवतात्मा,**
**हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिधी वगाह्य,**
**स्थितः पृथिव्या इव मानदण्डः।।**

'एवरेस्टः' इति अस्य उच्चतमं शिखरम् अस्ति। वर्षारम्भे हिमालयः वृष्टिकारकं मानसूनाख्यं वायुमवरुध्य देशे वर्षणाय प्रेरयति, येन भूमिः शस्यश्यामला जायते, राष्ट्रं च धनधान्यपूर्णं भवति।

एवं हिमालयः अस्माकं संस्कृतेः, समृद्धेः वन-सम्पदश्च आधारः। अतः देशवासिभिः भृशं स्तूयते पूज्यते च।

## 10. तीर्थराज प्रयागः

भारते बहूनि तीर्थानि सन्ति। तीर्थानां राजा प्रयागराजः उत्तर प्रदेशस्य प्रयागनगरे स्थितः अस्ति। अस्मिन् तीरे गङ्गा-यमुना-सरस्वती इति तिस्रः नद्यः सम्मिलन्ति। आसां नदीनां पवित्रे संगमे असंख्याः जनाः प्रतिवर्षं स्नानं कुर्वन्ति पुण्यं च अर्जयन्ति।

प्रयागराजस्य महत्त्वम् अति प्राचीनम्। पुरा अत्र अनेके अश्वमेधादयः यज्ञाः सम्पन्नाः अतो हि अयं प्रयागराजः। प्रति द्वादशवर्षम् अत्र कुम्भपर्वः भवति। अस्मिन् महापर्वणि देशस्य सकलेभ्यः भागेभ्यः असंख्याः तीर्थयात्रिणः स्नानार्थम् आगच्छन्ति। अत्र पवित्रसंगमे स्नात्वा महात्मनां विदुषां च उपदेशं श्रुत्वा तनुमनोभ्याम् आत्मनः पावयन्ति।

प्रयागे विविधविद्याकेन्द्रम् प्रयागविश्वविद्यालयः अस्ति। यत्र सुदूरेभ्यः अञ्चलेभ्यः सहस्रशः विद्यार्थिनः विद्याध्ययनाय आगच्छन्ति ज्ञानम् अवाप्य च राष्ट्रस्य गौरवं वर्द्धयन्ति।

## 11. वसुधैव कुटुम्बकम् (2019AO)

विश्वस्य स्रष्टा ईश्वरः एकः एव अस्ति। सर्वे प्राणिनः च तस्य तनयाः सन्ति। अतः विश्वस्य सर्वेषु भागेषु स्थिताः जनाः रूप-वर्ण-भाषा-संस्कृति-भेदान् धारयन्तः अपि अभिन्नाः एव। यतो हि सर्वेषां मूलप्रवृत्तयः समानाः एव। यथा एकः जनः सम्माने सुखम् अपमाने च दुःखम् अनुभवति तथैव अन्येऽपि। अतः श्रेष्ठः जनः सः एव यः सर्वेषु प्राणिषु समानं व्यवहारं करोति, सर्वेषु स्निह्यति, न कमपि पीडयति।

अद्य तु विज्ञानस्य प्रभावेण देशकालयोः अन्तरः प्रायः समाप्तिं गतः। भारते स्थितः जनः विदेशेषु स्थितानां जनानां समाचारं प्रतिदिनं प्राप्नोति दूरभाषेण च वार्ताम् करोति। दूरदर्शनेन तु सर्वं विश्वं करतलस्थितमेव जातम्। एतस्य सहयोगेन कुत्रचिदपि घटितां घटनां क्षणादेव वयं ज्ञातुं समर्थाः भवामः।

अतः उपर्युक्तस्थितौ विश्वबन्धुत्वस्य भावनायाः महतीं आवश्यकता अस्ति। अतः महर्षिभिः उक्तम्–

"उदारचरितानां तु वसुधैव कुटुम्बकम्"

## 12. संस्कृतभाषायाः महत्त्वम् (2018HQ, HR, 19AS, AU, 20MP)

### अथवा संस्कृतभाषायाः गौरवम् (2020MR)

संस्कृत भाषा संसारस्य प्राचीनतमा मुख्या भाषा अस्ति। व्याकरणादिदोषरहितभाषा संस्कृतभाषेति कथ्यते। संस्कृत साहित्यम् अति विशालम् अस्ति। अस्मिन् खण्डकाव्यं, महाकाव्यं, दूतकाव्यं, नाटकं, दर्शनं, ज्योतिरायुर्वेदादयः सर्वेऽपि विद्यन्ते। बाणवाल्मीकिहर्षकालिदासाश्वघोषादयः अस्य श्रेष्ठाः कवयः सन्ति। संस्कृतदर्शनशास्त्रम् अद्यापि जगति अद्वितीयं वर्तते।

अस्याः भाषायाः व्याकरणम् अद्वितीयम् अस्ति। विश्व प्रसिद्धः पाणिनिकृत व्याकरणग्रन्थः अस्यामेव भाषायाम् अस्ति। पुरा सर्वे जनाः संस्कृत भाषायाम् एव वदन्ति स्म; अतः समग्रमपि प्राचीनसाहित्यं संस्कृत भाषायामेव लिखितम् अस्ति। ग्रन्थाः संस्कृत भाषायां सन्ति। संस्कृतसाहित्यस्याध्ययनेन सद्विचाराः स्वयमेव उत्पद्यन्ते।

संस्कृतभाषा सम्पूर्ण भारते समानरूपेण अङ्गीकृता आदृता च अस्ति। अतः राष्ट्रियैक्यसंस्थापनाय अद्भुतं सामर्थ्यम् आवहति। एतादृश्याः समृद्धायाः मातृभूतायाः संस्कृतभाषायाः संवर्द्धनाय अस्माभिः सर्वविधः प्रयासः कर्त्तव्यः।

## 13. पर्यावरणम् (2018HP,HQ,HR,19AP,AQ,20MP,MS,MT,MU)

### अथवा पर्यावरण संरक्षणस्य उपाया:
### अथवा पर्यावरण संतुलनम् अथवा पर्यावरण सुरक्षा
### अथवा पर्यावरण संरक्षणम् (2019AS, AT)

अस्माकं परित: प्राकृतिक वातावरण: पर्यावरण कथ्यते। अन्ये प्राणिनस्तथैव मनुष्योऽपि प्रकृत्या: क्रोडे जनुरधत्त। मृत्स्ना-जल-वायु-वनस्पति-खग-कीट-पतङ्ग-जीवाणव: इति पर्यावरणस्य घटका: विद्यन्ते। मानव जीवने पर्यावरणस्य अति महत्त्वपूर्णं स्थानं अस्ति। स्वस्थं पर्यावरणं एव मानवस्य स्वस्थ जीवनस्य प्रमुख: आधार: मन्यते। पर्यावरणं शुद्धं भवति तत्र जीवनं अपि सुखमयं भवति। सम्प्रति उद्योगानां तीव्रविकासात् पर्यावरणं दूषितम् अभवत्। औद्योगिक संस्थानेभ्य: निर्गतं दूषितं जलं वातावरणं दूषितं करोति। इदमेव दूषितं जलं नदीं सम्मिलित: तस्या: अपि जलं दूषितं करोति। नगरेषु विशाला: उद्योगा: वायु प्रदूषणं करोति। अनेन अनेके रोगा: समुत्पद्यन्ते। अत: पर्यावरण शुद्धये योजनाबद्ध: प्रयासा: कुर्यु:।

## 14. यौतुकम् ( दहेज प्रथा )

प्राचीनकाले कन्याया: विवाहस्य अवसरे पिता यथाशक्ति स्वेच्छया कन्यां उपहारान् ददाति स्म, इदं कन्याधनं कथ्यते। परम् अधुना यौतुक प्रथा भयंकरं रूपं गृहीतवती। इदानीम् तु वर पित्रो: इच्छानुसारं यौतुकं दीयते। यदि वर पित्रो: इच्छानुसारं यौतुकं न दीयते तर्हि कन्या आजीवनं पीड़िता भवति। अस्मात् कारणात् एव प्रतिदिनं अनेका: नवविवाहिता: यौतुकस्य बलि-वेदीं आरोहन्ति। इयं प्रथा अवश्यमेव दूरीकरणीया। समाज: यौतुकम् प्रथाया: अवश्यमेव विरोधयेत्। यौतुकं याचनाया: लोभप्रवृत्तिं त्यजेत्। एतदर्थं युवकान् अग्रसर: भवेयु:। तदा एव अस्य निवारणाय समर्थ भवितुं शक्नोति।

## 15. परिवार कल्याणम् (2019AO, AT, 20MP) (2020MT)

### अथवा जनसंख्या समस्या
### अथवा जनसंख्या विस्फोट:
### अथवा जनसंख्या विस्फोट वर्णनम्

सम्प्रति अस्माकं देशे जनसंख्या वर्धमाना वर्तते। अस्मात् कारणात् अन्नाभावजीविकाभावे: अनेका समस्या समुत्थिता। आसां समस्यानां समाधानं एकमात्रं परिवारनियोजनम् एव अस्ति। एकस्मिन् परिवारे द्वि एव शिशू स्याताम्। एतत् एव परिवार नियोजनस्य तात्पर्य भवति। अति परिमित सदस्यानां परिवार: एव सुखी भवति। परिवारस्यकल्याणेन समाजस्य कल्याणं भवति। समाजस्यकल्याणेन देशस्य कल्याणं भवति। अत: परिवार नियोजनाय प्रत्येक: जन: सचेतयेत्। लघु परिवार: सुखस्य आधार: भवति। लघु परिवारे शिशूनां पालनं सम्यक् रूपेण भवति। अत: अस्य साफल्याय सर्वथा प्रयास: कर्त्तव्य:।

## 16. दूरदर्शनम् (2020MQ)

अद्य विज्ञानस्य युगम् अस्ति। विज्ञानं मानवाय सुख साधनानि प्रयच्छति। विज्ञानस्य आविष्कारेषु 'दूरदर्शनं' सर्वोत्तम: आविष्कार: विद्यते। अधुना दूरदर्शनं मानवजीवने महत्त्वपूर्णं स्थानं लभते। वयं दूरदर्शनस्य साहाय्येन दूरवर्ति देशस्य चित्राणि पश्याम:। दूरदर्शनम् प्रसारणस्य एक: सबल: माध्यम: अस्ति। इदं मनोरंजनस्य प्रमुखं साधनं अस्ति। दूरदर्शनेन अनेका: मनोरञ्जका: ज्ञानवर्धका: च कार्यक्रमा: प्रसारयन्ते। विविधा: राजनीतिक:, सांस्कृतिक:, सामाजिक: च कार्यक्रमा: दूरदर्शनेन दृष्टुं शक्यन्ते। अस्माकं देशे दूरदर्शनस्य अनेकानि केन्द्राणि सन्ति। बालका: युवान: वृद्धा: च निजनिज रुचिकरं कार्यक्रमं दृष्ट्वा प्रसन्ना: भवन्ति। दूरदर्शनं अद्य नरस्य सुहृद् अस्ति। प्राय: प्रत्येके गृहे दूरदर्शनस्य यंत्र: विद्यमान: अस्ति।

## 17. अनुशासनम् (2018HR, HQ, 19AP,AQ,AT,20MS, MU)

समाजे नियमानां पालनं अनुशासनं भवति। जीवने अनुशासनस्य विशेषं महत्त्वं भवति। प्रत्येके पदे अनुशासनं आवश्यकं भवति। अनुशासनं बिना किमपि कार्यं सफलं न भवति। छात्रेभ्य: अनुशासनं परमावश्यकमस्ति। अनुशासित: सर्वेभ्य: प्रिय: अस्ति। सामाजिक व्यवस्था हेतु अनुशासनं परमावश्यकमस्ति। यस्मिन् समाजे अनुशासनं न भवति तत्र सदैव कलह: भवति। शिक्षकस्य अनुशासने छात्रा: निरंतरं उन्नतपथं गच्छन्ति। अत: अनुशासनस्य पालनं जीवने अति आवश्यकं अस्ति।

## 18. राष्ट्रपिता महात्मा गान्धी (2018 HP)

**अथवा**

## महापुरुषस्य जीवनम्

महात्मा गान्धी अस्माकं राष्ट्रपिता अस्ति। अस्य महापुरुषस्य प्रयासेन एव परतन्त्र भारतवर्ष: स्वतंत्र: अभवत्। अस्य महापुरुषस्य जन्म गुर्जर प्रदेशे पोरबन्दर नामके नगरे अक्टूबर मासस्यद्वितारिकायां 1869 तमे खिष्टाब्दे अभवत्। तस्य जन्म नाम मोहनदास: आसीत्। तस्य पिता कर्मचन्द गान्धी माता च पुतलीबाई आसीत्। अस्य प्रारम्भिकी शिक्षा भारते उच्च शिक्षा च इंगलैण्ड देशे अभवत्। विधि शिक्षा प्राप्य स: स्वदेशे प्राडविवाककर्म कर्तुम् आरभत्। स: शोषितानां दलितानां च उद्धारम् अकरोत्। अयं सत्याग्रह नामकस्य आन्दोलनस्य सफलं प्रयोगं अकरोत्। स: सत्याग्रहेण विदेशीयान् जनान् देशात् बहि: निस्सारितवान्।

## 19. वनसम्पत् (वनस्य महत्त्वम्) (2019AO, AQ)

**अथवा वन सम्पदा**

**अथवा वृक्षाणाम् महत्त्वम्** (2018 HT)

निविडानां वृक्षाणाम् समूह: 'वनम्' इति कथ्यते। मानवजीवने वनानां विशिष्टं महत्त्वं वर्तते। वनानि मानवजीवनं सन्तुलितम् विदधति। भारतीयसंस्कृतौ तु वनानां महत्त्वपूर्णं स्थानम् अस्ति। वनोद्भवा वृक्षा: मानवेभ्य: प्राणवायुं प्रयच्छन्ति। वनानि अस्मभ्यं बहुश: लाभकराणि सन्ति। एभ्य: विविधा: औषधय: काष्ठानि च लभ्यन्ते। वन संरक्षणम् अनिवार्यमेव अस्ति। वृक्षेषु देवता वसन्ति इति अस्माकं महापुरुषाणाम् आस्था अद्यापि सत्यैव। वन रक्षणमेव मानवजीवनरक्षणम् अस्ति।

## 20. राष्ट्रपक्षी मयूर:

मयूर: शोभन: पक्षी अस्ति। अस्य पक्षास्तु विधिना सौन्दर्येण परिपूरिता:। अत: वर्षाकाले मेघाच्छन्नेषु दिवसेषु यदा मयूर: वने नृत्यति तदा तु अलौकिकं दृश्यम् उपतिष्ठते। मयूरपक्षस्य सौन्दर्येण आकृष्ट: भगवान् श्रीकृष्ण: मयूर पक्षम् स्वकिरीटरूपेण अधारयत्। मयूर: खगानाम् राजा राष्ट्रीय: पक्षी च कथ्यते। अस्य ग्रीवा दीर्घा नीलवर्णा च भवति। अस्य शिरसि एकाशिखा भवति। मयूरस्य पुच्छं मनोहरं भवति। मयूर: सर्पान् भक्षयति। मयूरस्य वाणी मधुरा प्रिया च भवति।

## 21. क्रिकेट-क्रीडनम् (2018HP, 20MR)

अस्माकं देशे सम्प्रति बहुविधानि क्रीडनानि प्रचलितानि सन्ति। तेषु क्रिकेट क्रीडनम् अति लोकप्रियं मनोरंजकं च अस्ति। इदं क्रीडनं विश्वस्य कतिपयेषु देशेषु क्रीड्यते। प्राय: प्रतिवर्षम् अन्तर्राष्ट्रीय क्रिकेट स्पर्धाश्च आयोज्यन्ते। अस्मिन् क्रीडने द्वे दले भवत:। एकस्मिन् दले एकादश क्रीडका: भवन्ति। एकं दलं कन्दुकं लक्ष्ये प्रक्षिपति अपरश्च कन्दुकं दण्डेन (बल्ले से) प्रहरति। यस्य दलस्य धावनानि (रन) अधिकानि भवन्ति तद् दलं विजयी भवति। अत: स्वास्थ्य-विकासाय अन्तर्राष्ट्रीय सम्बन्धविकासाय च अस्माभि: प्रयत्न: कर्त्तव्य:।

क्रिकेट क्रीडनम् स्वास्थ्याय हितकरं भवति। क्रिकेट क्रीडनम् शरीरं स्वस्थं स्फूर्तियुक्तं च भवति। इदानीं राष्ट्राणां मध्ये क्रिकेटस्पर्धा पारस्परिक मैत्री-सम्बन्ध-स्थापने सम्पर्कसूत्रतां गता। एतेन परस्परं स्पर्द्धा सहयोगभावना च वर्धते।

## 22. अस्माकं विद्यालय: (2018HT)

अस्माकं विद्यालयस्य नाम 'राजकीय इण्टर कालेज' अस्ति। अयं नगरस्य मध्ये स्थित: अस्ति। अत्र बहव: छात्रा: पठन्ति। अस्माकं विद्यालयस्य भवनं विशालं सुन्दरं च अस्ति। अस्य विद्यालयस्य सर्वे अध्यापका: परिश्रमेण पाठयन्ति। ते छात्रेषु स्नेहं कुर्वन्ति। विद्यालयस्य प्रधानाचार्य: सुयोग्य: सज्जन: च अस्ति। अस्माकं विद्यालये वार्षिक महोत्सव: भवति। महोत्सवस्य पश्चात् प्रधानाचार्य: छात्रेभ्य: मिष्ठान्नानि पुरस्कारान् च वितरति। विद्यालये श्री रामनारायण महोदय: एक: आदर्श अध्यापक: अस्ति। स: अस्मान् संस्कृतं पाठयति। तस्मिन् कोऽपि दुर्गुण: न अस्ति। सर्वे अध्यापका: छात्रा: च तस्य आदरं कुर्वन्ति।

## 23. उद्यमेन हि सिद्ध्यन्ति कार्याणि (2020MQ, MS)

**अथवा परिश्रम: अथवा उद्यम:**

1. अपरे खलु संसारे सर्व एव मानवा: सुखमयं जीवनम् कामयन्ते।
2. जीवनं सुखमयं विधातुं सुखं शान्तिश्च अपेक्षते।
3. जीवनं पुरुषार्थेनैव चलति।

4. अतः मानवः पुरुषार्थी उद्यमी भवेत्।
5. आलस्यं नाम अनुद्योगः।
6. उद्योगशीला एव जनाः सर्वदुःखानि विहाय सुखानि समृद्धिं च अनुभवन्ति।
7. संसारे उद्योगस्य महन्महत्तवं सर्वैः स्वीकृतमस्ति।
8. उद्यमी मानवः एवं आत्मपौरुषेण स्वाभीष्टसिद्धिम् अनायासेनैव लभते।
9. उद्यमी जनः असम्भवमपि सम्भवं विधातुं शक्नोति।
10. लक्ष्मीः उद्योगी जनानामेव वशवर्तिनी भवति।
11. यदि मानवः जीवने सुखं सफलतां च अपेक्षते तदा तु तेन सदैव सर्वथा च उद्योगः समाचरणीयः।

## 24. महाकविः कालिदासः (2019AU)

### अथवा मम प्रियकविः

### अथवा कालिदासः

1. विश्वसाहित्यस्य चर्चायां प्रचलितायां महाकवेः कालिदासस्य नाम प्रथमकोटिक कविसमवाये श्रद्धया प्रस्तूयते।
2. अस्य कवेः जीवनवृत्तमधिकृत्य अद्यापि वक्तुं न शक्यते।
3. महाकविः कालिदासः प्रसन्न प्रतिभा समन्वितः नैकासु प्रावीण्यं वितनोति।
4. गीतिकाव्ये, महाकाव्ये, दृश्यकाव्ये च कौशलम् आकलयन् असौ सहृदय-समाजे कवि चक्रे च श्रद्धया स्मर्यते।
5. अस्य महाकवेः निर्मिताः इमे ग्रन्थाः विख्याताः सन्ति–ऋतुसंहारः, मेघदूतम्, कुमारसम्भवम्, रघुवंशम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् च।
6. तत्र ऋतुसंहारः, मेघदूतं च गीतिकाव्यत्वेन, कुमारसम्भवं रघुवंशं च महाकाव्यत्वेन, मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् च दृश्यकाव्यत्वेन प्रसिद्धाः रचनाः सन्ति।
7. कालिदासस्य काव्यानां भाषा प्रसाद गुण सम्पन्ना।
8. अस्य काव्येषु वैदर्भी रीतिः समुज्जृम्भते।
9. कविनाऽनेन शृंगार रस प्रधानानि काव्यानि रचितानि, येषु यथायथम् अन्येषामपि रसानां निष्पत्तिः भवति।
10. सूक्तीनां निर्माणे कविरयं चतुरः।
11. 'वैदर्भीरीतिसन्दर्भे कालिदासो विशिष्यते' उपमा कालिदासस्य, कविकुलगुरुः कालिदासो विलासः प्रायिकश्चोपमालङ्कारः कालिदासोक्तकाव्यादौ एवमादीनि।

## 25. महामना मालवीयः (2020MQ)

1. पण्डित मदनमोहनमालवीयस्य जन्म एकषष्ट्युत्तराष्ट्रादशशततमे ख्रिष्टाब्दे दिसम्बरमासस्य पञ्चविंशति दिनाङ्के तीर्थराज प्रयागे एकस्मिन् ब्राह्मणकुले अभवत्।
2. अस्य जनकः पण्डित व्रजनाथ चतुर्वेदः संस्कृत भाषायाः विश्रुतो विद्वानासीत्।
3. निर्धनोऽपि धर्मकर्मणि सततरतोऽयं विद्वान समाजे समादृत आसीत्।
4. मदनमोहनमालवीयस्य प्रारम्भिकी शिक्षा प्रयागे एवैकस्यां संस्कृतपाठशालायां जाता।
5. कालान्तरे सः प्रयागे प्रथम संस्थापिते राजकीय हाईस्कूल नाम्नि विद्यालये पठन् 'इन्ट्रेन्स' परीक्षामुदतरत्।
6. ततः म्योर सेन्ट्रल कालेजेऽधीयानः बी. ए. परीक्षायाः पारं गतः।
7. काशी हिन्दू विश्वविद्यालयस्य स्थापना पण्डित मालवीयः अकरोत्।
8. विश्वविद्यालयस्य संस्थापनानन्तरमेव स कुलपतिपदमलङ्कृतवान्।
9. काशी हिन्दू विश्वविद्यालयस्य विकासाय सततं प्रयत्नरतोऽपि मालवीय महोदयः देशस्यासहाय जनानां महान्तं क्लेशं दर्शं दर्शं परमः खिन्नो अभवत्।
10. मालवीय महोदयस्य विपुलं यशः विश्वविद्यालयरूपेण जगति शाश्वतं स्थास्यति।

## 26. स्वास्थ्य शिक्षा

स्वस्थं शरीरं सर्वधर्माणां प्रथमं साधनं अस्ति। शरीर तदैव किञ्चितकर्तुं शक्नोति, यदा तत् स्वस्थं भवति। अस्माकं जीवने

स्वास्थ्य शिक्षायाः अतिमहत्त्वपूर्णस्थानम् अस्ति। स्वास्थ्यरक्षायाः उपायानां सम्यक् चिन्तनं एव स्वास्थ्यशिक्षा कथ्यते। व्यायामः स्वास्थ्यरक्षायाः सर्वोत्तमः उपायः अस्ति। शरीरं व्यायामेन बलवत् स्वस्थं, पुष्टं च भवति। व्यायामः शरीरस्य सर्वांगीण विकासाय अवश्यकीयः। स्वस्थे शरीरे एव स्वस्थं मन वसति। अतः व्यायामशीलस्य मनः सदा प्रसन्नं भवति। व्यायामेन शरीरस्य बुद्धेश्च विकासो भवति। व्यायामः धावनं, कूर्दनं, तरणं, क्रीडनं, भ्रमणम् इत्यादयः अनेक विधाः भवन्ति। अतैव सर्वे स्वशरीरस्य स्वास्थ्यरक्षार्य व्यायामः अवश्यं करणीयः।

## 27. यातायातस्य नियमाः

राजमार्गेषु सुरक्षायै यातायातस्य नियमानां विधानं अभवत्। वयं सर्वे यातायातस्य नियमानां पालयेम। राजमार्गे सदैव वामहस्ते चलेम। पदातिनः जेब्राक्रॉसिंग स्थानैव राजमार्गं पारं कुर्युः। चतुष्पथे रक्तहरितपीतां प्रकाशसंकेतानां पालयेम। रात्रौ उत्तेजकवर्णानां वस्त्राणि दध्युः। सड़कमार्गे यानानि निर्धारितगत्यानुसारेण एव चलेयुः। मार्गे सदैव अवधानपूर्वकं चलेयुः। द्विचक्रिकायां पार्श्वे परावर्त्तक प्रकाशपट्टिकायाः प्रयोगः अवश्यमेव कुर्युः। द्विचक्रयानानां प्रयोगसमये शिरस्त्राणस्य अवश्यमेव प्रयोगम् कुर्युः। अस्माकं सुरक्षा यातायात नियमपालने निहिता अस्ति।

## 28. वृक्षस्य महत्त्वम्

वृक्षाः जनाः स्वच्छम् वायुः ददाति। वृक्षाः पर्णैः पुष्पैः च शोभन्ते। अस्य वर्णः हरितः भवति। वृक्षाः प्राणरहिताः जड़पदार्थाः न। तेषामपि प्राणोऽस्ति। तेऽपि रोगग्रस्ता भवन्ति। वृक्षाः पादैः पातालं स्पृश्यन्ति। वृक्षाः पादैः (मूलैः) जलं पिबन्ति। वृक्षे काकः, चटकः शयेन च तिष्ठन्ति। वृक्षेषु भ्रमराः भ्रमन्ति मधुपानं च कुर्वन्ति। वानराः वृक्षेषु कूर्दन्ति। वृक्षेण फलानि विकसन्ति। जनाः वृक्षाणां फलानि भक्षयन्ति। वृक्षाः परोपकाराय फलन्ति।

## 29. व्यायामस्य महत्त्वम्

एतत् कथ्यते शरीमाद्यं खलु धर्मसाधनम्। स्वस्थशरीरेण एव धर्माचरणं कर्तुं प्रभवति नरः। स्वस्थशरीरं कस्मात् प्राप्येत। अस्य स्वास्थ्यस्य अनेकानि साधनानि सन्ति। तेषु 'व्यायाम' इति महत्त्वपूर्णं साधनमस्ति।

यदि मनुष्यः दीर्घायुः वाञ्छति, तर्हिं तेन नियमित व्यायाम करणीयः। स्वास्थ्य रक्षायै व्यायामः अतीव आवश्यकः अस्ति। नियमित व्यायामनैव शरीरं नीरोगं जायते।

व्यायामस्य अनेके लाभाः सन्ति। अनेन बलं वर्धते, शरीरस्य सर्वेषां अंगानां विकासो भवति, तथा शरीरे रुधिर संचारः सम्यक् भवति। प्रातःकाले वायुः प्रदूषणरहितः अस्ति। अतः प्रतिदिनं व्यायामेन शुद्धवायुं लभते। प्रातःकाले वातावरणमपि उत्साहवर्धकमस्ति। अतः प्रातःकाले एव व्यायामः करणीयः। व्यायामः गृहे न कर्त्तव्यः। सदैव क्रीडा स्थाने, उद्याने वा करणीयः। नियमित व्यायामेन शरीरे रोगाः न उद्भवन्ति। शरीरस्य रोगेभ्यः रक्षणाय व्यायामः आवश्यकः।

यथा व्यायामः आवश्यकः तथा उचित आहार सेवनमपि आवश्यकम्। व्यायामेन क्षुधावर्धनं भवति, किन्तु उचितं भोजनमेव सेवितव्यम्।

स्वस्थ शरीरं मानवः कार्यकुशलः भवति। रुग्णः मानवः किमपि कार्यं कर्तुं असमर्थः। धर्म-अर्थ-काम-मोक्ष एते चत्वाराः पुरुषार्थाः। तेषां प्राप्यर्थं शरीर स्वास्थ्यं आवश्यकम्। स्वस्थे शरीरे स्वस्थ आत्मा निवसति इति मन्यते।

आरोग्यशालिनां जीवनम् आनन्ददायकं भवति। ये जनाः दीर्घजीवनं, स्वस्थजीवनं वाञ्छन्ति तैः व्यायामः अवश्यमेव करणीयः एतदेव अन्ते कथनम्।

## 30. पर्यावरणप्रदूषणम्

साम्प्रतिके काले निखिलेऽस्मिन् जगति मानवसभ्यतायाः समक्षमनेके समस्यात्मका दुष्प्रभावाः समुज्जृम्भते। पर्यावरणस्य प्रदूषणमपि तथैव मुख्या समस्या मानवसभ्यतायै परिदृश्यते। अधुना औद्योगिकप्रसारेण न केवलं जलं, वायुः, फलमन्नादिकं च प्रदूषितमपितु समग्रमपि भूमण्डलं दूषितं भवति। प्रतिदिनं परमाणुयंत्राणां रेडियोधर्मिता सर्वत्र प्रसरति, विषाक्तगैसीयतत्वानां प्रसारेण, बृहदाकारौद्योगिक यंत्राणामपशेषितैः पदार्थैः, विविधानां यानादीनां धूमपुञ्जैश्च तथैवान्यैः संयंत्रादिभिः सर्वत्रवातावरणं भूलोकस्य वायुमण्डलं प्रदूषितं भवतीति वृत्तं दृग्गोचरी भवति।

पर्यावरणप्रदूषणस्य प्रभावाद् जगति रोगदीनां वृद्धिः सञ्जाता, अन्नपानादिषु रेडियोधर्मिपदार्थानां सम्मिश्रणात् सर्वत्र वायुमण्डलम् तु दूषितं भवत्येव, तस्माद् आनुवंशिकप्रभावोऽपि भवति।

अधुना औद्योगिकप्रसारेण न केवलं जलं, वायुः, फलमन्नादिकं च प्रदूषितमपितु समग्रमपि भूमण्डलं दूषितं भवति। प्रतिदिनं परमाणुयंत्राणां रेडियोधर्मिता सर्वत्र प्रसरति, विषाक्तगैसीयतत्वानां प्रसारेण, बृहदाकारौद्योगिक यंत्राणामपशेषितैः पदार्थैः, विविधानां यानादीनां धूमपुञ्जैश्च तथैवान्यैः संयंत्रादिभिः सर्वत्रवातावरणं भूलोकस्य वायुमण्डलं प्रदूषितं भवतीति वृत्तं दृग्गोचरी भवति।